# उपनिषत्कालिकशिक्षायाः स्वरूपं लक्ष्यं च

**रामसेवकझाः**

जगत्यस्मिन् नैकाः समस्याः सन्ति। सर्वाः समस्याः अज्ञानम्, अन्यायः, अभावः, अकर्मण्यता एतासु चतसृषु मौलिकसमस्यासु अन्तर्भावयितुं शक्यन्ते। अन्यायः, अभावः, अकर्मण्यता एताः तिस्रः समस्याःएकस्यां मूलसमस्यायामन्तर्भवन्ति, सामूलसमस्या अज्ञानम्। यतः एताः मौलिकाः तिस्रः समस्याः अज्ञानादेव प्रादुर्भवन्ति। अज्ञानमेव एतासां जननी विद्यते।

अस्य जगतः अनेकासां समस्यानां मूलसमस्या अथवा बीजसमस्या अज्ञानमेव। यथा महतः न्यग्रोधस्य आधारः तस्य मूलानि भवन्ति। मूलानां निमित्तमथवा वृक्षस्य कारणं तस्य अणुमात्रं सूक्ष्मं बीजं भवति। एकस्मिन् सूक्ष्मवटबीजे महतः न्यग्रोधस्य महती संभावना विद्यते । एवमेव लोकेऽस्मिन् अनेकाः समस्याः सन्ति। बीजसमस्या अज्ञानं नानारूपाणिधृत्वा असंख्यकाः समस्याः इव प्रतिभाति। सर्वासां समस्यानां समाधानं तु अशक्यम् अतः मौलिकचतस्रः समस्याः परिहरामः चेद् अन्याः समस्याः स्वतः निवर्तन्ते। अतः एताः मौलिकसमस्याः परिहर्तुमस्माकं वैदिकसंस्कृतौ वर्णाश्रमव्यवस्था दृश्यते। तद्यथा– **वर्णाः**[1]

अज्ञाननिवारणाय, ज्ञानप्रदानाय – ब्राह्मणः

अन्यायनिवारणाय, न्यायव्यवस्थास्थापनाय – क्षत्रियः

अभावनिवारणाय, उत्पादनसंवर्धनाय – वैश्यः

अकर्मण्यतानिवारणाय, परिश्रमाय, सेवायै – शूद्रः

चतुर्णां वर्णांनाम् ऐहिकामुष्मिकफलप्राप्तये आश्रमव्यवस्था[2] विहिता। यथा –

ब्रह्मचर्याश्रमः – शिक्षणाय, ज्ञानार्जनाय

गृहस्थाश्रमः – गाहर्स्थजीवनाय, प्रजायै, त्रयाणाम् आश्रमाणमालम्बनाय धर्मकार्याय

वानप्रस्थाश्रमः – जपतपानुष्ठानादिकं कर्तुम्

संन्यासाश्रमः – सर्वसङ्गपरित्यागःलोककल्याणाय सर्वत्र

अटनम्। ज्ञानप्रदानं, ब्रह्मणि चरणम्।

## शिक्षा –

वेदानामेव सारभूताः उपनिषदः। उपनिषदामनुशीलनेन उन्नता काचित् शिक्षापरम्परा शिक्षास्वरूपञ्च विलोक्यते। विद्या कथम् अधिगता भवति अथवा ज्ञानप्रदानाय शिक्षाव्यवस्था कथं भूता स्यात् सा च तैतिरीयोपनिषदि शिक्षाध्याये प०चमहासंहितासु अन्यतमायां संहितायां वर्णिता।

## अथाधिविद्यम् –

**आचार्यः पूर्वरूपम् अन्तेवास्युत्तररूपं विद्यासन्धिः प्रवचनं संधानम ्।** इत्यधिविद्यम्[3]। अस्यां संहितायां शिक्षायाः कात्स्न्र्यम् अथवा विद्यायाः प्राप्तिः, आचार्यः अन्तेवासी, विद्या, प्रवचनम् एभिः चतुभिः घटकैः भवति इति वर्णितम्। यथा – संहितायां वर्णानां सामिप्यं भवति तद्वद् एतेषां चतुर्णां घटकानां नैकट्यात् शिक्षा पूर्णा भवति। लोके शिक्षायामेते घटकाः अनिवार्याः सन्ति।

**आचार्यः** – ज्ञानवान् सन् ज्ञानप्रदानाय एकतः भवति तर्हि जिज्ञासुः **अन्तेवासी** ज्ञानावाप्तये अपरतः भवति। एतयोः संयोगः **विद्या**निमितमेव भवति। अपि च अध्यापनपटुः आचार्यः ज्ञानस्य संप्रेषणं **प्रवचन**माध्यमेन करोति। तदानीं विद्याप्राप्तिर्भवति।

**आचार्यः** कस्माद् **आचारं ग्राहयति, आचिनोति अर्थम्, आचिनोति बु(िमिति वा**[4]।

### आचार्यः आचारं ग्राहयति –

आचार्यः सदाचारी, धार्मिकः, नैतिकः, तपस्वी सन् आत्मनः अन्तेवासिनः आचारं ग्राहयति। वस्तुतः आचार्यस्य सानिध्ये आचार्यस्य आचरणं वीक्ष्य उपदेशमन्तरेण अन्तेवासिनः तथा वर्तितुं प्रवर्तन्ते। आचारस्तु आचारणेनैव ग्राह्यते न तु उपदेशेन। अनेन छात्रा जीवने कथं वर्तितव्यम् इति जानन्ति। सदाचारं, शिष्टाचारं, लोकव्यवहारं, सामाजिकतां च विदन्ति। छात्रेषु सामाजिकव्यावहारिकगुणस्य विकासो भवति। कर्तव्याकर्तव्यानि, धर्माधर्माणि, उचितानुचितानि अनेन बुध्यन्ते तथा चिकीर्षन्ति।

## आचार्यः आचिनोति अर्थम् –

A First EPQRST Journal- www.jahnavisanskritejournal.com , Issue- 18th , Vol – V,. Page-121-129 ISSN 976-8645

आचार्यः बहुश्रुतः स्यात्। नानाविद्यासु, कलासु, शिल्पेषु निपुणः भवेत्। लोके सर्वविधज्ञानविज्ञानस्य शिक्षणं शब्दैः भवति। शब्दाः तेषामर्थाश्च परस्पर सम्बद्धाः भवन्ति। तथा च भाष्ये **सिद्धेशब्दार्थ सम्बन्धे** इति शब्दार्थयोः नित्यतां परस्परं सम्बन्धतां च सूचयति। आचार्यः समुपयुक्तशब्दैः अर्थान् नानापदार्थान् विषयान् बोधयति। शब्दैः एव अर्थज्ञानं भवति । शब्दैरेव नानाविद्याः विज्ञानं कलाः शिल्पं ज्ञायन्ते। बहुश्रुतः आचार्यः अनेकाः विद्याः शिल्पानि च शिक्षयति। नानाकलासु च प्रावीण्यं प्रापयति। अनेन शैक्षिककलाकौशलानां विकासो जायते।

## आचार्यः आचिनोति बुद्धिम् –

आचार्यः अन्तेवासिनि अन्तर्निहिताः सुप्ताः शक्तीः, जागरयति। बुद्धेः विकासं करोति, मानसिकशक्तिं वर्धयति बुद्धिं सर्जनकार्येषु विद्यासु च नियोजयति। सन्मार्गे प्रेरयति। अनेन अन्तेवासिनः बौद्धिकः मानसिकः अन्तःसुप्तशक्तीनाम् विकासः सम्पद्यते।

आचार्यः स्थूलाद् आरभ्य सूक्ष्मपर्यन्तं बोधयति। **तद्यथा–**

**अन्नमयकोशः** इति स्थूलशरीरस्य कृत्स्नबोधः तस्य परिणतिः शरीरे समत्वं निरोगिता च।

**प्राणमयकोशः** इति शरीरे विद्यमानानां प्राणानां परिचयः। प्राणनिग्रहः संयमनम्। प्राणायामेन च मलानां क्षयः विवेकप्राप्तिः।

**मनोमयकोशः** इति मनसः परिचयः मनोनिग्रहः तदर्थम् उपायाः मानसिकशक्तीनां प्राप्तिः मनसः एकाग्रता विभूतिप्राप्तिः।

**विज्ञानकोशः** – अहंकारस्य नाशः तात्विकज्ञानम् अज्ञानस्य क्षयः ज्ञानप्राप्तिः

**आनन्दमयकोशः** – आत्मानुभूतिः आनन्दावाप्तिश्च [5]।

**अन्तेवासी** – अन्ते वस्तुं शीलमस्य। यः आचार्यस्य सन्निकटे सेवां शुश्रूषां कुर्वन् विद्यामधिगच्छति। स च अन्तेवासी कथं भवेत्? अधिकारी स्यात ्। अपात्राय यदि ज्ञानं दीयते चेत् तद् अहितायैव भवति न तु कल्याणाय। अतः अयं जनः अस्याः विद्यायाः अधिकारी विद्यते न वेति परीक्ष्य ज्ञानं प्रयच्छति आचार्य। इति।

A First EPQRST Journal- www.jahnavisanskritejournal.com , Issue- 18th , Vol – V,. Page-121-129 ISSN 976-8645

एकवर्षपर्यन्तं तपसा ब्रह्मचर्येण श्रद्धया वासः कर्तव्यः अनेन पात्रत्वं परीक्ष्योचितं यदि प्रतिभाति चेत् उपदेशः दीयते स्म। एवं अन्तेवासी अधिकारी नवेति परीक्षन्ते स्म। य कश्चित् अन्तेवासी तपसा, ब्रह्मचर्येण श्रद्धया वर्तते तस्मिन् एव प्रदत्त ज्ञानं फलितं भवति अन्यत्र तु भग्नं पात्रमिव गलत्युपदिष्टम्।

**ब्रह्मचारी** – अन्तेवासी ब्रह्मचारी स्यात्। ब्रह्मणि चरति इति ब्रह्मचारी। ब्रह्म नाम वेदः। ब्रह्मनाम परमतत्वम्। इन्द्रियाणि मनः बुद्धिं संयम्य अन्तर्निहितं। शक्तिं वेदाध्ययने अथवा परब्रह्मान्वेषणे निदधाति। विषयविकाररहितं पवित्रं जीवनं यस्य भवति स ब्रह्मचारी।

**जिज्ञासुः** – अन्तेवासी जिज्ञासुर्भवेत्। ज्ञानं परमतत्त्वं ज्ञातुं यस्य इच्छा भवति स जिज्ञासुः। परमार्थतः जिज्ञासामन्तरेण लौकिकं ज्ञानमपि सम्यक् प्राप्तुं न शक्यम् तर्हि अध्यात्मसूक्ष्मज्ञानस्य का कथा अत एव वेदान्तदर्शनेऽपि प्रथमसूत्रे **अथातो ब्रह्मजिज्ञासा**[6] जिज्ञासा पदप्रयोगो विद्यते अनेन ज्ञायते अन्तेवासिनः स्वीया जिज्ञासा यदि तीव्रा न भवति स्वयमेव स ज्ञातुं तत्परो न भवति तर्हि तस्मिन् ज्ञानं वा तत्वज्ञानं फलितं न भवति।

**श्रद्धावान्** – अन्तेवासी श्रद्धावान् स्यात्। श्रद्धामन्तरेण ज्ञानप्राप्तिर्दुष्करा। तथा च गीता **श्रद्धावान् लभते ज्ञानं तत्परः संयतेन्द्रियः। ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति।।**[7] अन्तेवासी श्रद्धावान् तत्परः संयतेन्द्रियः भवेत्। एतादृशः एव जनः ज्ञानार्जनं कर्तुमर्हति।

**प्रशान्तचित्तः** –अन्तेवासी शमान्वितः प्रशान्तचितः स्यात्। स एव ब्रह्मविद्यायाः अधिकारी भवति।

**विद्या** – उपनिषत्कालिकशिक्षायां लौकिकपारलौकिकविद्यानां उत्कर्षः प्रतिभाति। पराविद्या अपराविद्येति द्वे विद्ये आस्ताम् तथाच मुण्डकोपनिषद् । **तस्मैहोवाच द्वे विद्ये वेदितव्ये इति हस्म ब्रह्मविदो वदन्ति।** पराच[illegible]परा च[8]

तत्रापरा ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः शिक्षा कल्पो व्याकरणं निरूक्तम् छन्दो ज्यौतिषमिति। अथ परा यया तदक्षरमधिगम्यते।

छन्दोग्योपनिषदि सप्तमप्रपाठके अपराविद्यायाः विस्तरशः वर्णनमुपलभ्यते।

**प्रवचनम्** – आचार्यः प्रवचनमाध्यमेन ज्ञानम् अन्तेवासिन उपदिशति। प्रवचने शिक्षणपद्धतयः शिक्षणव्यूहाः , शिक्षणयुक्तयः , शिक्षणसूत्राणि , शिक्षणकौशलानि एतानि सर्वाणि अन्तर्भवन्ति। उपनिषदि अनेकाः शिक्षणपद्धतयः दृश्यन्ते। तद् यथा –

**सूत्रपद्धतिः** – कतिपयेषु सारवत्सु शब्देषु अथवा सूत्रेषु सूत्ररूपेण अथवा साररूपेणतत्वकथनं

यथा– मूलमन्विच्छ [9]

**प्रत्यक्षपद्धतिः** –

शिक्षणपद्धतिषु एषा अतीव प्रभावदायिनी मनोवैज्ञानिकी, विशिष्टापद्धतिः विद्यते। अत्र प्रत्यक्षप्रदर्शनपुरस्सरं प्रयोगपुरस्सरं बोधयति आचार्यः। उपनिषत्सु प्रत्यक्षपद्धतेः नेकाः सन्दर्भाः सन्ति। तद्यथा –

न्यग्रोधफलमाहरेतीदं भगव इति। भिन्धीति।
भिन्नं भगव इति। किमत्रपश्यसि इत्यण्व्य इवेमा धाना इति
आसाम् अङ्गैकां भिन्धीति
भिन्ना भगव इति। किमत्रपश्यसीति।
न किञ्चन भगव इति।[10]

अत्र प्रत्यक्षपद्धत्या शिक्षणं विहितं किञ्च स्थूलात् सूक्ष्मं, सरलात् कठिनं, ज्ञाताद् अज्ञातं इत्यादीनि शिक्षणसूत्राणि प्रयुक्तानि सन्ति।

**क्रियामुखादधिगम** –

क्रियया अधिगमः यस्यां पद्धत्यां भवति अथवा क्रियया छात्रः अधिगच्छति सा पद्धति क्रियामुखादधिगमपद्धतिः वर्तते। उपनिषदि क्रियामुखात् अधिगमः दर्शितः। तद् यथा –

**लवणमेतदुदकेऽवधायाथ मा प्रातरूपसीदथा इति। स ह तथा चकार। तं होवाच यद् दोषा लवण मुदकेऽवाधा अङ्ग तदाहर इति। तद् धावमृश्य न विवेद।**

यथा विलीन मेवाङ्गास्यान्तादाचामेति। कथमिति लवणमिति। मध्यादाचामेति। कथमितिघ लवणमिति। अन्तादाचामेति। कथमितिघ लवणमिति। अभिप्राश्य एनद् अथ मोपसीदथा[11]।

**प्रश्नोत्तरपद्धतिः** –

प्रश्नोत्तरपद्धतौ प्रश्नोत्तरमाध्यमेन अध्यापनं भवति उपनिषत्सु बहुत्र एषा पद्धतिः प्रयुक्ता।

प्रश्नोपनिषदि साक्षात् प्रश्नोत्तरपद्धत्या सूक्ष्मतत्वस्य शिक्षणं विद्यते।

**व्याख्यापद्धतिः –**

व्याख्यानपद्धतेरू प्रयोगः उपनिषदि बहुत्र प्रयुक्ता विद्यते विषयस्य विस्तरशः स्पष्टीकरणमनया पद्धत्या विधीयते तथाच ओम् इत्येतद् अक्षरमुदगीथमुपासीत ओमिति ह्युद् गायति तस्योपव्याख्यानम्। अत्र उपव्याख्यानं पदेनैव ज्ञायते इह व्याख्याविधिः प्रयुक्तः। यथा एषां भूतानां पृथिवीरसः। पृथिव्याः □पो रसोऽपामोषधयो रस ओषधीनां पुरूषो रसःए पुरूषस्य वागरसो वाच ऋग् रस ऋचः साम रसः साम्न उदगीथो रसः[12]

**वादविवादविधि , शास्त्रार्थपद्धतिः –**

वादे वादे जायते तत्त्वबोधः इति वचनं श्रूयते तत्त्वनिर्णयाय संवादः, वादः, वादविवादः, शास्त्रार्थः अपेक्षितः।

केनापि किमपिकथितमिति न प्रमाणम् अपितु तत् हेतुप्रदानपुरस्सरं प्रमाणीकर्तव्यम्, सैव शास्त्रार्थपद्धतिः। उपनिषत्सु शास्त्रार्थपद्धतेः बहूनि प्रमाणानि सन्ति। तद्यथा –

जनकस्य सभायां याज्ञवल्यउषस्तचाक्रायणयोः शास्त्रार्थः। तद् यथा अथ हैनमुषस्तश्चाक्रायणः पप्रच्छ याज्ञवल्क्येति होवाच यत्साक्षात् अपरोक्षाद् ब्रह्म य □त्मा सर्वान्तरस्तं मे व्याचक्ष्व इत्येष त □त्मा सर्वान्तरः कतमो याज्ञवल्क्य सर्वान्तरो यः प्राणेन प्राणिति स त □त्मा सर्वान्तरो योऽपानेनापानिति[13]।

**विद्याधिगमाय सोपानानि** – श्रवणम् , मननम्, निदिध्यासनम्, साक्षात्कारः एभिः उपायैः परमार्थतः विद्याधिगमो भवति, तत्वबोधो जायते। तथा च **आत्मा वारे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः**[14]। श्रवणम् . श्रोतव्यः , मननम् . मन्तव्यः , निदिध्यासनम् . निदिध्यासितव्यः , साक्षात्कारः द्रष्टव्यः ।

अनेन प्रमाणेन ज्ञायते यत् उपनिषदि अधिगमः बोधः इत्यस्य तात्पर्यं केवलं विषयपरिचयः तद् विषयकं ज्ञानं वा नास्ति अनुभूतिः प्रधाना विद्यते। तदानीमेव ज्ञानप्राप्तेः कृत्स्नता भवति। ज्ञानमात्मसात् भवेत्। अस्मद् अङ्गभूतं भवेत् तस्य तत्वतः अनुभूतिः स्यात् न तु शाब्दिकपरिचयः। तत्वज्ञानस्य तात्विकानुभूत्या अज्ञानस्यावरणं विदीर्य स्वस्मिन् ज्ञानस्वरूपेऽवस्थानम् □त्मानुभूतिः अहं ब्रह्मास्मि इत्यस्य तत्वतः बोधो जायते। यथार्थ अनुभूत्यैव मनुजस्य विचारे व्यवहारे च परिवर्तनं भवति। यथा

A First EPQRST Journal- www.jahnavisanskritejournal.com , Issue- 18th , Vol – V,. Page-121-129 ISSN 976-8645

**वारूणीविद्या** भृगुर्वै वारूणिः। वरूणं पितरमुपससार। अधीहि भगवो ब्रह्मेति। तस्मा एतत्प्रोवाच अन्नं, प्राणं चक्षुः श्रोत्रं, मनो वाचमिति। तं होवाच। यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति। यत्प्रयन्त्यभिसंविशन्ति। तद् विजिज्ञासस्व तद् ब्रह्मेति। स तपोऽतप्यत। स तपस्तप्त्वा अन्नं ब्रह्मेति व्यजानात्। अन्नाद् ध्येव खल्विमानि भूतानि जायन्ते। अन्नेन जातानि जीवन्ति। अन्नं प्रयन्त्यभिसंविशन्ति इति तद् विज्ञाय। पुनरेव वरूणं पितरमुपससार[15] ।अत्र वारूणीविद्यायां अन्नमयकोशः , प्राणमयकोशः , मनोमयकोशः, विज्ञानमयकोशः,आनन्दमयकोशः, इति पञ्चकोशानां क्रमशः अनुभूत्या ज्ञानप्राप्ते क्रमः प्रदर्शितः। गुरूपदेशं शृणोति तपः तपति अनुभवति ततः आगामिनं जिज्ञासुः जिज्ञासते। यथार्थ तत्त्ववेत्ता ब्रह्मज्ञानी ;न तु शाब्दिकतत्त्ववेत्ताद्ध अन्तःतृप्त भवति हेयोपादेयशून्यः भवति। अन्तःप्रज्ञानेन विवेकेन लौकिकान् विषयान् न स्पृहयति। तदानीमेव लोकहिताय प्रवर्तते यतः स्वीयम् आत्महितं सम्पन्नम् परोपकाररू एव शिष्ट अतपरार्थाय घटते।

**श्रध्दा** – श्रद्धावान लभते ज्ञानम्। अश्रद्धो जनः किमपि साधयितुमर्जयितुं वा नार्हति। अश्रद्धयैव जीवने स्थैर्यं न भवति। अश्रद्धो सर्वथा संशयग्रस्तोभवति संशयात्मा विनश्यति[16]। अतः उपनिषदि बहुत्र **श्रद्धस्व सौम्य श्रद्धस्व**[17] इति उपदेशो दृश्यते।

आचार्यान्तेवासिनोरू सम्बन्धः पितापुत्रवत् वर्तते तथा च श्रूयते पुत्रीयति आचार्यः शिष्यम् पुत्रम् इव आचरति इत्यर्थः । आचार्यः अन्तेवासिनः सर्वविधकल्याणाय यतते।

**अनुशासनम्** – आचार्यः अन्तेवासी अनुशासने भवतः उभौ तपश्चरतः उभौ ब्रह्मचर्यं चरतः। कठोरव्रतानिधृत्व जीवनं पावयतः। तैतिरीयोपनिषदि शिक्षाध्याये शिक्षान्ते दीक्षान्तोपदेशः अनुशासनरूपेण प्रदीयते। वेदमनूच्याचार्योऽन्तेवासिनमनुशास्ति। सत्यंवद। धर्मचरं। स्वाध्यायान्म। प्रमदः। आचार्याय प्रियंधनमाहृत्य प्रजातन्तुं मा व्यवच्छेत्सीः। सत्यान्न प्रमदितव्यम्। धर्मान्न प्रमदितव्यम्। भूत्यै न प्रमदितव्यम्। देवपितृकार्याभ्यां न प्रमदितव्यम्। मातृदेवोभव पितृदेवोभव आचार्य देवोभव अतिथिदेवोभव। यान्यवद्यानि कर्माणि तानि सेवितव्यानि नो इतराणि यान्यस्माकं सुचरितानि तानि त्वयोपास्यानि नो इतराणि एष आदेशः एष उपदेशः। एषा वेदोपनिषद्। एतदनुशासनम् एवमुपासितव्यम्। एवमुचैतदुपास्यम्[18]। इत्थम् अग्रिमे जीवने सदाचारपूर्णजीवनाय अनुशासनं विहितम्।

**लक्ष्यम्** – उपनिषत् शिक्षायाः लक्ष्यं आत्मानुभूतिः तथा च **आत्मा वारे द्रष्टव्यः श्रोतव्यो मन्तव्यो . निदिध्यासितव्यः**[19]।

स यो ह वै तत्परमं ब्रह्मवेद ब्रह्मैव भवति। नास्याब्रह्मवित्कुले भवति। तरति शोकं तरति पाप्मानं गुहाग्रन्थिभ्यो विमुक्तोऽमृतो भवति[20]। नास्याब्रह्मवित्कुले भवति[21]। **भिद्यते हृदयग्रन्थि छिद्यन्ते सर्वसंशयाः।क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे** ।

एवमुपनिषदि शिक्षायाः उत्कृष्टं स्वरूपं वर्णितम्। यया ऐहिकामुष्मिकफलप्राप्तिर्भवति। यस्यां शिक्षायां मानवस्य व्यक्तित्वस्य परिनिष्ठितोविकासः सम्पद्यते। एवमत्र उपनिषदि वर्णिता शिक्षायाः स्वरूपं लक्ष्यं च दिङ्मात्रं दर्शितम् इति ।

**रामसेवक झा**
सहायकाचार्यः, शिक्षाशास्त्रविभागः
राष्ट्रियसंस्कृतसंस्थानम् (मा.वि)
क. जे. सोमैयासंस्कृतविद्यापीठम्
विद्याविहारः, मुम्बई

## सन्दर्भ-सङ्केतः

1. पुरुषसुक्तः यजुर्वेदः समाजपुरुषस्य ब्रह्मणः स्वरूपं यत्र वर्णितम्
2. मनुस्मृतिः 6.97
3. तैतिरीयोपनिषद्............ शिक्षाध्याय
4. निरूक्तम्
5. वारुणीविद्या तैत्तिरीयोपनिषद भृगुवल्ली
6. वेदान्तदर्शनम् 1.1
7. गीता 4.39
8. मुण्डकोपनिषद 1.1.4
9. छान्दोग्यपनिषद 6.8.4
10. छान्दोग्यपनिषद 6.12.1
11. छान्दोग्यपनिषद 6.13.2
12. छान्दोग्यपनिषद 1.1.2
13. बृहदारण्यकोपनिषद 3.4.1

A First EPQRST Journal- www.jahnavisanskritejournal.com , Issue- 18th , Vol – V,. Page-121-129 ISSN 976-8645

14. बृहदारण्यकोपनिषद 2.4.5

15. तैत्तिरीयोपनिषद भृगुवल्ली 2

16. प्रश्नोपनिषद 2

17. गीता 4.40

18. छान्दोग्यपनिषद 6.12.2

19. बृहदारण्यकोपनिषद 2.4.5

20. माण्डुक्योपनिषद 10

21. मुण्डकोपनिषद 2.2.8

******